क्र.ग.१

संस्कृत. याज्ञीक.

[illegible] दी प्रयोग

[illegible] ४

✓ 3315

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1) ॥श्रीमहेशाभट्टिनयागा ... ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(2)

म॰प्र॰ श्रीमन्महागणपतयेनमः॥ ॥श्रीवेदनारायणायनमः श्रीगुरुभ्योनमः प्रणम्यगोपालमनंतमाद्यंने
१ त्रांचलानंदितगोपवृंदं स्मार्तप्रयोगंविदधातियल्लाडिहिरण्यकेशीयविधौमहेशः १ सत्याषाढमुनिर्वबंदे
स्वर्णकेशास्त्रमद्वितं। योनुष्ठेयपदार्थानांक्रमकल्पमकल्पयत् २ यत्कृतांवेदवृत्तीनामाद्रीयंतेविपश्चि
तः मातृदत्तश्चिरंजीयाद्भक्तिरूपेणतन्नवित ३ ॥ ॥अथसंस्कारशांतिश्राद्धाख्यप्रकरणत्रयेणहि
रण्यकेशिस्मार्तकर्मणांप्रयोगोभिधीयते तत्राद्ये संस्कारप्रकरणेगर्भाधानाद्यः संस्काराः द्वितीये
शांतिप्रकरणेवास्तुशमनाद्याः शांतयः तृतीयेश्राद्धप्रकरणेमासिकश्राद्धादिश्राद्धानिचोच्यंते॥ ॥
अथसंस्कारप्रकरणं॥ ॥तत्रप्रथमंषोडशकर्मणांप्रयोगउच्यते॥ ॥गर्भाधानंपुंसवनंसीमंतोन्नयनजा
तकर्मनामकर्मान्नप्राशनचौलोपनयनवेदव्रतचतुष्टयगोदानसमावर्तनविवाहपितृमेधाख्यानि तत्रसं
स्कारेषुगर्भाधानसंस्कारस्यप्राथम्याद्नुष्ठानसौकर्यार्थंचौलोपक्रमस्तत्त्यज्यगर्भाधानादिक्रमेणसं स॰प्र॰
स्काराणांप्रयोगउच्यते पितृमेधप्रयोगः श्राद्धप्रकरणेवक्ष्यते गर्भाधानाद्युपनयनांतानांसंस्कारा १

(2A)

णांकालातिक्रमेसतिआगतेप्राप्तश्चित्तेनापिचरितार्थत्वे उपनयनप्रभृति संस्काराणांतुकालातिक्रमेस
तितत्कालातिक्रमेसतितत्कालातिक्रमप्रायश्चित्तंकृत्वा उपनयनाख्यः संस्कारास्तत्स्वरूपकर्तव्याइत्यभिप्राये
णाउपनयनमुख्येनैवतन्मात्रंकृतंतस्तत्रकृत्वा एवमेवोपनयनमात्रस्यगौतमसूत्रेअन्तरहरदत्तव्याख्या आगतेगर्भा
धानादिसंस्काराविनाप्युपनयनेभवतिउपनयनेविनाअग्न्यादिसंस्कारानभवेतीत्यभिप्रायेणोपनयनमु
खेनसूत्रितमाचार्येणेति॥ ॥अथगर्भाधानप्रयोगः॥ ॥रजोदर्शनेसतिस्त्रीत्रिरात्रंस्नानेतैलेनाभ्यंज
नंकंकतादिनाशिरसिलेखनं कज्जलादिनाचक्षुषोरंजनंदंतधावनंनखनिकृंतनंरज्जुकरणंअंजल्या
दिनाजलपानमित्येवमादीनिनकुर्यात रजोदर्शनादिषोडशरात्रिर्नातिक्रतुस्तन्मध्येचाद्यंरात्रिचतुष्टयंपर्वपर्ववासं
क्रोस्यमावास्याव्यतीपातैकादशीश्राद्धाहमलमासादिकंचविहाय दंपत्योश्चंद्रताराबलानुकूल्येयुग्मदिवसेगर्भाधानं
कार्यं॥ ॥कर्तातिलस्नातःकृतमांगलिकःस्वलंकृतःवस्त्राद्यास्तृतेपीठेप्राङ्मुखउपविश्याचम्यप्राणानायम्य
ॐ सुमुखश्चैकदंतश्चकपिलोगजकर्णकः लंबोदरश्चविकटोविघ्ननाशोविनायकः धूम्रकेतुर्गणाध्य

(3)

म॰प्र॰ भालचंद्रो गजाननः द्वादशैतानि नामानि यः पठेच्छृणुयादपि विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा संग्रामे सं
१ कटे चैव विघ्नस्तस्य न जायते शुक्लांबरधरं देवं शशिवर्णं चतुर्भुजं प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशांतये इत्यादि मं
गलश्लोकान्पठित्वा ॐ लक्ष्मीनारायणाभ्यां नमः उमामहेश्वराभ्यां नमः वाणीहिरण्यगर्भाभ्यां शचीपुरंद
राभ्यां मातापितृभ्यां इष्टदेवताभ्यो कुलदेवताभ्यो ग्रामदेवताभ्यो वास्तुदेवताभ्यो सर्वेभ्यो ब्राह्मणे
भ्यो नमः श्रीविष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य श्रीविष्णोरचिंत्यानंतवीर्यस्य शक्त्या ध्रियमाणब्रह्मांड
खंडयोर्मध्ये भूमंडले जंबूद्वीपे भारतवर्षे आर्यावर्ते अविमुक्तवाराणसीक्षेत्रे आनंदवने गौरीमुखे त्रिकंटक
विराजिते कुमारिकाक्षेत्रे भागीरथ्याः पश्चिमे देशे अद्य ब्रह्मणो द्वितीयपरार्धे श्वेतवाराहकल्पे वैवस्वतमन्वं
तरे अष्टाविंशतितमे युगचतुष्कांतर्गते कलियुगे प्रथमचरणे बौद्धावतारे विक्रमशके अमुकनाम्नि संवत्सरे अ
यने ऋतौ मासे पक्षे तिथौ वासरे नक्षत्रे योगे करणे सूर्ये चंद्रे देवगुरौ शेषेषु ग्रहेषु यथास्थानस्थितेषु सत्सु एवंगु
णविशेषणविशिष्टायां पुण्यतिथौ शुभतिथौ चेति पाठेन विविक्तौ देशकालौ संकीर्त्य ममास्यां भार्यायां मय रम०
२

(3A)

मगर्भसंस्कारातिशयद्वारास्यांजनिष्यमाणगर्भाणांबीजगर्भसमुद्भवैनोनिबर्हणद्वाराश्रीपरमेश्वरप्रीत्य
र्थंगर्भाधानाख्यंकर्मकरिष्ये तदंगंगणपतिपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंचकरिष्ये इति
संकल्प्यगणपतिंपूजयेत् प्रणवंमंत्रादौसर्वत्रपठेत ॐ गणानांत्वागणपतिं हवामहेकविंकवीनामु
पमश्रवस्तमं ज्येष्ठराजंब्रह्मणांब्रह्मणस्पतआनः शृण्वन्नूतिभिःसीदसादनं इति मंत्रेणगणपतये
नमइतिनाममंत्रेणवाआवाहनासनपाद्यार्घ्याचमनस्नानवस्त्रगंधपुष्पधूपदीपनैवेद्यानीतिपंचोपचारैर्वा
गणपतिंसंपूज्यपुष्पांजलिंदत्वा वक्रतुंडमहाकायकोटिसूर्यसमप्रभ। अविघ्नंकुरुमेदेवसर्वकार्येषुसर्व
दा इतिप्रार्थनाकार्या॥ ॥इतिगणपतिपूजा॥ ॥अथपुण्याहवाचनप्रयोगः॥ ॥तत्रगर्भाधानादिसर्वकर्म
स्वाशवंजेचकेषुचित्पुण्याहवाचनेविहितंब्राह्मणानन्नेनपरिविष्यपुण्याहंस्वस्तिकंऋद्धिमितिवाचयित्वि
त्यादिनासूत्रकृतातत्रदेवताकांक्षायांशास्त्रांतरोक्तादेवताउच्यंते गर्भाधानस्योरावंतेचब्रह्मा पुंसवनस्योभ
यत्रप्रजापतिः सीमंतस्योभयत्रधाता जातकर्मणउभयत्रमृत्युः नामकरणस्याहोसविता अंतेप्रजापतिः

(५)

म॰ प्र॰ आयुर्वर्धापनस्योभयत्राग्निरायुष्मान् अन्नप्राशनेस्योभयत्रसविताचौलस्योहीकेशिनः अंतेप्रजापतिः
३ उपनयनस्याद्याविंद्रः अंतेश्रद्धामेधे उपनयनस्य चतुर्थीद्वितीयपुण्याहवाचनेतुअश्वाः पुनरुपनयनस्यो
भयत्राग्निः ब्रह्मचारिव्रतोपाकरणविसर्गयोरुभयत्रसविताब्रह्मचारिव्रतलोपप्रायश्चित्तस्योभयत्रसवि
ता वेदोपाकरणोत्सर्जनयोरुभयत्रसविता समावर्तनस्योभयत्रश्रीर्हिरण्यावा विवाहस्योभयत्राग्निः श्रौ
नो पासनेपक्रमेतेचाग्निसूर्यप्रजापतयः दर्शपूर्णमासस्थालीपाकयोरुभयत्राग्निः वास्तुहोमस्योभयत्रवास्तोष्प
तिरंतेप्रजापतिः शूलगवस्योभयत्रेशानः प्रदोषव्रतस्योभयत्रेशानः नक्षत्रहोमेचोभयत्रनक्षत्रदेवताः ग्र नव ४
ग्रहयज्ञस्योभयत्राग्रयणदेवताः प्रत्येकंनवग्रहमखेचोभयत्रक्रमेणादित्यादिनवग्रहाः नंतरोग्रहमखेविब्रह्मा देवता ४
स्पस्त्रोभयत्र कूष्मांडहोमेचान्नायणोभयत्राग्न्यादयः सर्पबलेरुभयत्रसर्पाः नक्षत्रेष्टौउभयत्रनक्षत्रदेवताः
तडागाद्युत्सर्गेउभयत्रवरुणः एकोद्दिष्टस्योभयत्रप्रजापतिः सूतकांतेप्रधामं० अग्न्याधेयेउभयत्राग्न्यादयः
अग्निष्टोमेउभयत्रेंद्रः अनादिष्टकर्मसुसर्वत्रप्रजापतिः इतिबौधायनोक्ताः पुण्याहदेवताः॥ ॥कर्ताब्रह्म एम०
३

(5A)

णान्न्याद्दिनासंतर्प्यगंधादिनासंपूज्यनान्सुरायाद्देवाचयेत्॥ ॥ॐ महीद्यौः पृथिवीच नइमं यज्ञं मिमि
क्षतां पिपृतांनोभरीमभिः मंत्रेणदूर्वाद्दिरोहणतो भूमिंस्पृष्ट्वा ॐ ओषधयः समवदंतसोमेनसहराज्ञा य
स्मैकरोतिब्राह्मणस्तं राजन्पारयामसि तंडुलपुंजोक्तमा आजिघ्रकलशमह्युरुधारापयस्वत्यात्वाविशं
त्विंदवः समुद्रमिवसिंधवः सामासहस्रआभजप्रजयापशुभिः सहपुनर्माविशताद्रयिः मंत्राद्दत्वाकल
शोनिधायइमंमेगंगेयमुनेसरस्वतिशुतुद्रिस्तोमं सचतापरुष्ण्या असिक्न्यामरुद्वृधेवितस्तयार्जीकी
येशृणुह्यासुषोमया तीर्थजलेनपूरयित्वा गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं ईश्वरीं सर्वभूतानां
तामिहोपह्वयेश्रियं गंधंप्रक्षिप्य गंधपुष्पाद्दतादिनाअक्षितोक्तवा कांडात्कांडात्प्ररोहंती परुषः परुषः
परि एवानोदूर्वेप्रतनुसहस्रेणशतेनच दूर्वांनिधाय अग्नेरेतश्चंद्रं हिरण्यं अद्भ्यः संभूतममृतंप्रजासु त
त्संभरन्नुत्तरतोनिधाय अतिप्रयच्छदुरितिंतरेयं हिरण्यंनिधाय बृहस्पतेजुषस्वनोहव्यानिविश्वदेव्य रास्व
रत्नानिदाशुषे रत्नानि याःफलिनीर्याअफलाअपुष्पायाश्चपुष्पिणीः बृहस्पतिप्रसूतास्तानोमुंचंत्वंहसः

फलं युवासुवासाः परिवीतआगात्सउश्रेयान्भवतिजायमानः तंधीरासः कवयउंनयंतिस्वाधियोमनसादेव
यंतः वस्त्रं पूर्णादर्वि परापतसुपूर्णापुनरापत वस्नेवविक्रीणावहाइषमूर्जं शतक्रतो तंडुलसहितफ
लसहितपात्राभ्यामाननेपिधाय सर्वत्रमतिकलशंमेवावाहनस्नानसंस्थाप्य तत्त्वायामिब्रह्मणावंदमानस्तदा
शास्तेयजमानोहविर्भिः अहेडमानोवरुणेहबोध्युरुशंस मानआयुः प्रमोषीः उत्तरकलशेवरुणमावाह्य
वरुणायनमइतिगंधपुष्पधूपदीपनैवेद्यादिभिः संपूज्यदक्षिणांदत्वा ततोदेवताआवाहयेत् कलशस्यमुखे
विष्णुः कंठेरुद्रः समाश्रितः मूलेतत्रस्थितोब्रह्मामध्येमातृगणाः स्मृताः कुक्षौतुसागराः सर्वेसप्तद्वीपावसुं
धरा ऋग्वेदोथयजुर्वेदः सामवेदोह्यथर्वणः अत्रगायत्रीसावित्रीशांतिः पुष्टिकरीतथा आयांतुममशां
त्यर्थंदुरितक्षयकारकाः सर्वेसमुद्राः सरितस्तीर्थानिजलदानदाः आयांतुममशांत्यर्थंदुरितक्षयकारकाः
उत्तरकलशे अस्मज्जान्हविपित्र मातृदेवोभव पितृदेवोभव आचार्यदेवोभव अतिथिदेवोभव अवनिकृत
जानुमंडलः कमलमुकुलसदृशीमंजलिंशिरस्याधायदक्षिणेनपाणिनासुवर्णपूर्णकलशंधारयित्वाशिवः एमु॰ ४

अंगैश्चसहिताः सर्वेकलशंतुसमाश्रिताः

२ सर्वेभ्योदेवेभ्योब्राह्मणेभ्योनमोनमः ॥ २

देवा ३

(5A) एतेनमुहूर्तेनस्वस्त्येसयन्हे सदेवतेप्रीयेतां अग्निपुरोगाविश्वेदेवाः प्रीयंतां इंद्रपुरोगामरुद्गणाः प्रीयंतां विष्णु
पुरोगासर्वेदेवाः प्रीयंतां ब्रह्मपुरोगासर्वेवेदाः प्रीयंतां माहेश्वरीपुरोगाउमामातरः प्रीयंतां वसिष्ठपुरोगा
ऋषिगणाः प्रीयंतां अरुंधतीपुरोगाएकपत्न्यः प्रीयंतां ऋषयश्छंदांस्याचार्यावेदायज्ञाश्चप्रीयंतां ब्रह्मचब्रा
ह्मणाश्चप्रीयंतां श्रीसरस्वत्यौप्रीयेतां श्रद्धामेधेप्रीयेतां भगवतीकात्यायनीप्रीयतां भगवतीमाहेश्वरीप्री
यतां भगवतीऋद्धिकरीप्रीयतां भगवतीवृद्धिकरीप्रीयतां भगवंतौविघ्नविनायकौप्रीयेतां भगवान्स्वामीमहा
सेनःसपत्नीकःससुतःसपार्षदःसर्वस्थानगतःप्रीयतां हरिहरहिरण्यगर्भाःप्रीयंतां सर्वाग्रामदेवताःप्रीयंतां
सर्वाःकुलदेवताःप्रीयंतां सर्वावास्तुदेवताःप्रीयंतां हताब्रह्मद्विषः हताःपरिपंथिनः हताअस्य
कर्मणोविघ्नकर्तारः शत्रवःपराभवंयांतु शाम्यंतुघोराणि शाम्यंतुपापानि शाम्यंत्वीतयः शुभानिवर्धंतां
शिवात्र्यलवसं शिवाआपःसंतु शिवाऋतवःसंतु शिवाअग्नयःसंतु शिवाओषधयःसंतु शिवावनस्पतयःसंतु शि
शाकलाः संतु [redacted] शिवा

भगवतीतुष्टिकरीप्रियतां॥ भगवतीपुष्टिकरीप्रियतां॥५

(6)

भगवान्स्वामीमहासेनः प्रीयतां २

म प्र आकृतयः संतु शिवाश्चतिथयः संतु अहोरात्रे शिवे स्यातां निकामे निकामे नः पर्जन्यो वर्षतु फलिन्यो न ओषधयः
६ पच्यंतां योगक्षेमो नः कल्पतां शुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिता आदित्यपुरोगाः सर्वेग्रहाः
प्रीयंतां भगवान् नारायणः प्रीयतां भगवान्पर्जन्यः प्रीयतां ॐ पुण्याहकालान्वाचयिष्ये वाच्यतां उद्गातेव शकुने सा
मगायसि ब्रह्मपुत्र इव सवनेषु शंससि वृषेव वाजी शिशुमतीरपीत्या सर्वतो नः शकुने भद्रमावद विश्वतो नः शकुने पु
ण्यमावद ॥ आज्यपायनतिप्रत्तिर्वेयान्मा पुरोबल लक्ष्मीः परमामिवदनस्त्र लक्ष्मीस्तेभावयंति पुराणे पाल लक्ष्मीसंस्कृतरूम पत्त
रायनस्त्रेनमक्ष्ट गृहीतानभ्युत्वे पराविस्र्यंउहति अपनस्त्रनत्रेति यावंतिन चत्रस्तर्योगच्छेत् यत्रजपन्येयश्येत् ना
वंतिकुर्वेत नयत्कारास्यात्पुण्याहवक्रहते तानि दारुणानि यमनक्षत्राणि यान्यपि देवनक्षत्राणि तेषु कुर्यादिनय
कारीस्यात्पुण्याहस्ववेत्कृते मंगलकुंडं बिनेमहाजनान्नमस्कुर्वाणाय आशीर्वचनमपेक्षमाणाय आयुष्कक्रर्मकारि
णो पुण्याहं भवंतो ब्रुवंतु इति त्रिर्यजमानः ॐ पुण्याहमिति त्रिर्विप्राः अत्र सत्रकर्ता पुण्याहस्मरद्धि मिति वाच
यितत्फकृतात्स्वपरनिर्देशात्प्रतिवचने प्रथमैकवचनांताः प्रयोक्तव्याः ॐ स्वस्त्ययं वायुमुपब्रवामहै सोमं स्वस्ति एम॰
६

(6A)

प्रार्थनामानि।१

प्रार्थयन्तें एताः सत्याआशिषः संतु दीर्घानागानद्योगिरयस्त्रीणिविष्णुपदानिचतेनायुःप्रमाणेनपुण्या
हंदीर्घमायुरस्तु शिवाआपःसंतु सौमनस्यमस्तु अक्षतंचारिष्टंचास्तु अस्तुक्षतमरिष्टंच गंधाःपांतु सौमं
गल्यंचास्तु॰ अक्षताःपांतु आयुष्यमस्तु पुष्पाणिपांतु सौश्रियमस्तु तांबूलानिपांतु ऐश्वर्यमस्तु दक्षि
णाःपांतु बहुदेयंचास्तु दीर्घमायुः शांतिःपुष्टिस्तुष्टिश्चास्तु श्रीर्यशोविद्याविनयोवित्तंबहुपुत्रंचायुष्यं
चास्तु सर्वत्रब्राह्मणोरक्षितिप्रत्यक्षतनेदेयं यंकृत्वासर्ववेदयज्ञक्रियाकरणकर्मारंभाः शुभाःशोभनाःप्रव
र्तंते तमहमोंकारमादिंकृत्वाऋग्यजुःसामाशीर्वचनंबहुऋषिसंमतंभवद्भिरनुज्ञातः पुण्यंपुण्याहंवाचयि संविज्ञाकंप
ष्ये वाच्यतामितिविप्रावदेयुः ततउक्तस्वयथायोगं यजमानः ॐ भद्रंकर्णेभिः शृणुयामदेवाः भद्रंपश्येमा
क्षभिर्यजत्राः स्थिरैरंगैस्तुष्टुवांसस्तनूभिः व्यशेमदेवहितंयदायुः द्रविणोदाद्रविणसस्तुरस्य द्रविणोदाः
सनरस्यप्रयंसत् द्रविणोदावीरवतीमिषंनोद्रविणोदारासते दीर्घमायुः सविता पश्चातात्सविता पुरस्तात्सविता
त्तरात्तात्सविताधरात्तात् सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः नवोनवो भवति जायमानोन्हांके

Rajawade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai

(7)

म.प्र. नुरुषसामेत्स्मे भागं देवेभ्यो विदधात्यायन्प्रचंद्रमास्तिरतिदीर्घमायुः उद्वाहिविदस्रिराणावेतोऽस्युर्येऽस्मृ
५ द्राः सुहुते सुर्वेराण्हिरण्यपराक्रमतं तेभजंते वाहोद्राः सोमप्रतिनेतं आयुः आपतें दंतुजीवसे दीर्घायुत्वाय वर्चसे
यस्त्वाहृदाकीरिणामन्यमानो मर्त्यं मर्त्यो जोहवीमि जातवेदो यशो अस्मासुधेहि प्रजाभिरग्ने अमृतत्वमे
श्यां यस्मै त्वं सुकृते जातवेद उलोकमग्ने कृणवः स्योनं अश्विनं स पुत्रिणं वीरवंतं गोमंतं रयिं नशते स्वस्ति सं
तो सिंचाम्रियजुषा प्रजामायुर्धनंच व्रतनियमतपः स्वाध्यायक्रतुदमदानविशिष्टानां ब्राह्मणानां मनः समाधी
५ तिविप्राः यतां समाहितमनसस्स्मः प्रजमानः प्रसीदंतु भवंतः प्रसन्नाः स्मः शांतिरस्तु पुष्टिरस्तु तुष्टिरस्तु वृद्धिरस्तु तिविप्राःयजमानः ५
अविघ्नमस्तु आयुष्यमस्तु आरोग्यमस्तु शिवं कर्मास्तु कर्मसमृद्धिरस्तु वेदसमृद्धिरस्तु शास्त्रसमृद्धि
रस्तु पुत्रसमृद्धिरस्तु धनधान्यसमृद्धिरस्तु इष्टसंपदस्तु बहिर्देशे अरिष्टनिरसनमस्तु यत्पापं तत्प्रतिहत
मस्तु यच्छ्रेयस्तदस्तु उत्तरेकर्मण्यविघ्नमस्तु उत्तरोत्तरमहरहरभिवृद्धिरस्तु उत्तरोत्तराः क्रियाः शुभाः शोभ
नाः संपद्यंतां तिथिकरणमुहूर्तनक्षत्रसंपदस्तु तिथिकरणमुहूर्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयंतां तिथिकर एम० ५

(7A)

ये१

प१ भुवनस्यैतिः बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवंतु नः आदित्य उदयनीयः पथ्यैवैतः स्वस्त्या प्रयंतिप

म थ्यां स्वस्तिमभिघंति स्वस्त्यैवेतः प्रयंति स्वस्त्युद्यंति स्वस्ति न इंद्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति

नस्तार्क्ष्यो अरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु [illegible] दिवा वसवः सोम्यासः चतस्रो देवीरजराः अविष्ठाः ते यज्ञं

पांतु रजसः परस्तात् संवत्सरीणाममृतं स्वस्ति। महाभिस्ताद्दैः अमुककर्मकारिणे स्वस्तिं भवंतो ब्रुवंतु इतित्रि

र्यजमानः ॐ स्वस्तिरिति प्रतिवचनं त्रिः ॐ ऋध्याम स्तोमं सनुयाम वाजमानो मंत्रैः सरथेहोपयातं॥ यशो न प

क्वं मधु गोष्वंतरा भूतांशो अश्विनोः काममप्राः॥ सर्वामि[illegible] यामिति तं वै नेजसैव परस्तात् स्वर्पभवत् [illegible] स्तोभिर्म

ध्यतो संनेरूपरिष्टात्कायमानर्वतो [illegible] शाहे परिमि [illegible] सर्वाम ऋद्धिमार्ध्नोत् सर्वामृद्धिमृध्नोति य एवं वेद॥ ऋध्यास्म हव्यै

र्नमसोपसद्य मित्रं देवं मित्रधेयं नो अस्तु अनूराधान् हविषा वर्धयंतः। शतं जीवेम शरदः सवीराः॥ त्रीणि त्री(णि)

वै देवानामृद्धानि त्रीणि छंदांसि त्रीणि सवनानि त्रय इमे लोकाः ऋध्यामेव तदीर्यस्तु लोकेषु प्रतितिष्ठति

महाभिस्ताद्दैः अमुककर्मकारिणे ऋद्धिं भवंतो ब्रुवंतु इति त्रिः ॐ ऋद्धिरिति प्रतिवचनं त्रि श्रियेजातः श्रिय आ

म॰प॰

(8)

निरियापुश्रियंवर्चोजरितृभ्योदधातिश्रियंवसानाअमृतत्वमायन्भवंतिसत्यासमिथामितद्रौ श्रियएवैनंतच्छ्रि
यामादधातिसंततमत्वावषट्कृत्यसंततैसधीयत्नेमजपापशुभिर्यएवंवेदयस्मिन्ब्रह्माभ्यनूत्यतत्सर्वमेतत् अमु
चलोकमिदमत्वसर्वं तंनोनक्षत्रमभिजिद्धिनित्य श्रियंदधात्वहृणीयमानं अहेर्बुध्न्यमंत्रंमेगोपाय यमृष
यस्त्रैविद्याविदुः ऋचःसामानियजूंषि साहिश्रीरमृतासतां एभिर्मंत्रैः सुवासिनीभिर्नीराजनंकारयंति म
हामिण्याहि अमुककर्मकालिनोश्रीरस्त्वितिभवंतोब्रुवंतु इतिवि॰ अस्तुश्रीरस्त्वितिप्रतिवचनंद्विः वर्षशतेर
र्गामस्तु गोत्राभिवृद्धिरस्तु शिवंकर्मास्तु ब्रह्माभीयताकर्मांतेपुण्याहवाचनेहवेदाकारोपवनायाप्ताः सु
केभिररंगीराज्ञ्या ततन्वानक्रतुंपुनानः कविभिःपवित्रैः शोचिर्वसानः पर्यायुनुशंत्रि यौमिमीतेबृहतीनर्नैताः
नरश्र्यथ अश्वोकोभिगीतोमरुतः परिवेष्टारोमरुतस्यावसन्गृहे आविक्षितस्यकामप्रेर्विश्वेदेवाः सभासदइति
ततउत्तरकलशंदक्षिणहस्तेदक्षिणामुत्तरेगृहीत्वातामंत्राधानादपुंसंततंपात्रेनिषिंचेदेभिर्मंत्रैः वास्तोष्पते
प्रतिजानीह्यस्मान्स्वावेशोअनमीवोभवानः यत्त्वेमहेप्रतितन्नोजुषस्वशंनएधिद्विपदेशंचतुष्पदे वास्तोष्पते राम॰

(8A)

ग्रनन्नरांगोनस्रक्षिगपुस्फान्नोगोभिरश्वैभिरिंद्रो अन्नर्नासलेसुख्येस्यामपितेवसुत्रान्प्रतिनोजुषस्व वास्तोष्पते
प्रामयासंऽंस्तहातेलक्ष्मीमहिनरावयागातुमत्या आवः क्षेमउतयोगेवरंनोयूयंपातःस्वस्तिभिःसदानः अ
मीवुहावास्तोष्पतेविश्वारूपाण्याविशन्सखासुशेवएधिनः शिवंशिवं" ततःकर्तावामतःपत्नीमुपवे शिवं २
श्यपात्रेपानिजलेनपल्लवदूर्वाभिहस्तेस्पृश्यविप्राश्चभिषिंचेयुस्तिष्ठेनः समुद्रज्येष्ठाः सलिलस्यमध्या
त्पुनानायंत्यनिविशमानाः इंद्रोयावज्रीवृषभोरराहताआपोदेवीरिहमामवंतु याआपोदिव्याउतवास्रवंति
खनित्रिमाउतवायाःस्वयंजाः समुद्रार्थायाःशुचयःपावकास्ताआपोदेवीरिहमामवंतु यासांराजावरुणोया
ति मध्येसत्यानृतेअवपश्यंजनानां मधुश्चुतःशुचयोयाःपावकास्ताआपोदेवीरिहमामवंतुयासुराजावरु
णोयासुसोमोविश्वेदेवायासूर्जंमदंति वैश्वानरोयास्वग्निःप्रविष्टस्ताआपोदेवीरिहमामवंतु आयेनामिहृदे
वास्त्रापतामरुतांगणः आयंतांविश्वाभूतानियथायमेदपाअसत् आपइद्वाउभेषजीरापोअमीवचातनीः
आपःसर्वस्यभेषजीस्तास्तेकृण्वंतुभेषजं हस्ताभ्यांदशशाखाभ्यांजिह्वावाचःपरोगवी अनामयित्नुभ्यां

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

म॰भ॰
८

न्नाताभ्यांतोपस्पृशामसि इमाआपः शिवतमाइमाः सर्वस्यभेषजीः इमाराष्ट्रस्यवर्धनीरिमाराष्ट्रभृतोमृताः
याभिरिंद्रमभ्यषिंचत्प्रजापतिः सोमंराजानंवरुणंयमंमनुं ताभिरद्भिरभिषिंचामित्वा महंस्तांत्वमधिराजो
भवेह महांतंत्वामहीनांसम्राजंचर्षणीनां देवीजनित्र्यजीजनद्भद्रा जनित्र्यजीजनत देवस्यत्वासवितुः प्रसवे
(१) ऽश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामग्नेस्तेजसासूर्यस्यवर्चसेंद्रस्येंद्रियेणाभिषिंचामि बलायश्रियेयशसेन्नाद्या
य देवस्यत्वासवितुः प्रसवेऽश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यां अश्विनोर्भैषज्येन तेजसेब्रह्मवर्चसायाभिषिंचामि
देवस्यत्वासवितुः प्रसवेऽश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यां सरस्वत्यैभैषज्येन वीर्यायान्नाद्यायाभिषिंचामि दे
वस्यत्वासवितुः प्रसवेऽश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांइंद्रस्येंद्रियेण श्रियेयशसेबलायाभिषिंचामि देवस्य
त्वासवितुः प्रसवेऽश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यां सरस्वत्यैवाचोयंतुर्यंत्रेणाग्नेस्त्वासाम्राज्येनाभिषिंचामींद्र
स्यबृहस्पतेस्त्वासाम्राज्येनाभिषिंचामि सुरास्त्वामभिषिंचंतुब्रह्मविष्णुमहेश्वराः वासुदेवोजगन्नाथस्तथासंक
र्षणोविभुः प्रद्युम्नश्चानिरुद्धश्चभवंतुविजयायते आखंडलोग्निर्भगवान्यमोवैनिर्ऋतिस्तथा वरुणः पवनश्चैव रा॰म॰ ८

(9A)

धनाध्यक्षस्तथा शिवः ब्रह्मणा सहिताः सर्वे दिक्पालाः पांतु ते सदा कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रि
या मतिः बुद्धिर्लज्जा वपुः शांतिः कांतिः पुष्टिश्च मातरः एतास्त्वामभिषिंचंतु देवपत्न्यः समागताः आदित्य
श्चंद्रमा भौमो बुधजीवसितार्कजाः ग्रहास्त्वामभिषिंचंतु राहुः केतुः सुतर्पिताः देवदानवगंधर्वा यक्षराक्षस
पन्नगाः ऋषयो मुनयो गावो देवमातर एव च देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः अस्त्राणि सर्वशस्त्रा
णि राजानो वाहनानि च औषधानि च रत्नानि कालस्यावयवाश्च ये सरितः सागराः शैलास्तीर्थानि जलदा न
दाः एते त्वामभिषिंचंतु सर्वकामार्थसिद्धये ॐ भूर्भुवः स्वः अमृताभिषेकोऽस्तु ततश्चाचारप्राप्तं वस्त्रा
दिदानं तत्परिधानं च कुर्वंति तत्र मंत्रः युवा सुवासाः परिवीत आगात्स उ श्रेयान्भवति जायमानः तं धीरा
सः कवय उन्नयंति स्वाध्यो मनसा देवयंत इति ॥ ॥ इति पुण्याहवाचनप्रयोगः ॥ ॥ अथ मातृकापूजा ॥ ॥
गौरी पद्मा शची मेधा सावित्री विजया जया देवसेना स्वधा स्वाहा मातरो लोकमातरः धृतिः पुष्टिस्तथा तुष्टि
रात्मनः कुलदेवता ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा वाराही च तथेंद्राणी चामुंडाः सप्त मातरः

(१०)

म.भ. ९ एतागणपतिसहिताचतुर्विंशत्यस्तत्पुंजेष्वावाह्य नर्यप्रजांमेगोपाय अमृतत्वायजीवसे जातांजनिष्य
माणांच अमृतेसत्येप्रतिष्ठितो इतिप्रतिष्ठाप्य नाममंत्रैः षोडशोपचारैः पंचोपचारैर्वासंपूज्य गौरीर्मि
मायसलिलानितक्षत्येकपदीद्विपदीसाचतुष्पदी अष्टापदीनवपदीबभूवुषीसहस्राक्षरापरमेव्योमन्
इतिपुष्पांजलिंदत्वा योगेश्वगणाः सर्वेपूजामादायपार्थिवी इष्टकामप्रसिद्ध्यर्थंपुनरागमनायचेतिवि
सर्जयेत्॥ ॥अथनांदीश्राद्धं॥ ॥सदूर्वांकुरान्अक्षतांजलेचादाय सत्यवसुसंज्ञकाविश्वेदेवाः भूर्भुवः स्वः
इदंवः पाद्यमियेचवृद्धिः मातृपितामहीप्रपितामह्यः नांदीमुख्यः भूर्भुवः स्वः इदंवः पाद्यमियेचवृद्धिः पि
तृपितामहप्रपितामहाः नांदीमुखाः भूर्भुवः स्वः इदंवः पाद्यमियंचवृद्धिः मातामहमातुःपितामहमातुः
प्रपितामहाः पत्नीसहिताः नांदीमुखाः भूर्भुवः स्वः इदंवः पाद्यमियेचवृद्धिः [redacted]
सत्यवसुसंज्ञकाविश्वेदेवाः भूर्भुवः स्वः इदंवः आसनगंधाद्युपचारकल्पनं
स्वाहानमइयंचवृद्धिः मातृपितामहीप्रपितामह्यः नांदीमुख्यः भूर्भुवः स्वः इदंवः आसनगंधाद्युपचारकल्पनंस्वाहा राम ९

Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(10A)

नमइयंचवृद्धिः पितृपितामहप्रपितामहाःनांदीमुखाः भूर्भुवः स्वः इदंवः आसनगंधाद्युपचारकल्पनंस्वाहा
नमइयंचवृद्धिः मातामहमातुः पितामहमातुः प्रपितामहाः पत्नीसहिताः नांदीमुखाः भूर्भुवः स्वः इदंवः
आसनगंधाद्युपचारकल्पनंस्वाहानमइयंचवृद्धिः गौर्यादिषोडशमातरः ब्राह्म्यादिसप्तमातरश्चगणपतिस
हिताः भूर्भुवः स्वः दास्यमानंयुग्मब्राह्मणभोजनपर्याप्तमन्नंहिरण्यंवायथाशक्तिस्वाहानमइयंचवृद्धिः सत्य
वसुसंज्ञकाविश्वेदेवाः इदंवः दास्यमानंयुग्मब्राह्मणभोजनपर्याप्तमन्नंहिरण्यंवायथाशक्तिस्वाहानमइयंचवृ
द्धिः मातृपितामहीप्रपितामह्यः नांदीमुख्यः भूर्भुवः स्वः दास्यमानयुग्मब्राह्मणभोजनपर्याप्तमन्नंहिरण्यंवाय
थाशक्तिस्वाहानमइयंचवृद्धिः पितृपितामहप्रपितामहाः नांदीमुखाः भूर्भुवः स्वः इदंवः दास्यमानयुग्मब्राह्मणभो
जनपर्याप्तमन्नंहिरण्यंवायथाशक्तिस्वाहानमइयंचवृद्धिः मातामहमातुः पितामहमातुः प्रपितामहाः पत्नीसहि
ताः नांदीमुखाः भूर्भुवः स्वः इदंवः दास्यमानयुग्मब्राह्मणभोजनपर्याप्तमन्नंहिरण्यंवायथाशक्तिस्वाहानमइयंचवृ
द्धिः ततः उपास्मैगायतानरः पवमानायेंदवे अभिदेवांइयक्षते अभितेमधुनापयोथर्वाणोअशिश्रयुः देवंदेवा

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com